# Shivaproktam Suropadeshah

# ஶிவப்ரோக்தம் ஸூரோபதே³ஶ:

## Document Information

Text title : Shivaproktam Suropadeshah

File name : suropadeshaHshivaproktaM.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 50 - suropadeshaH | 5-55||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# ஶிவப்ரோக்தம் ஸுரோபதே3ஶ:

மந்மாயாமோஹிதா யூயமபி4ஜாதாஸ்ஸ்த2 ஸத்தமா: ।
ப4வந்த: பஶவஸ்ஸர்வே சாப்3ரஹ்மஸ்தம்ப4பூர்வகா: ॥ 5 ॥

அஹம் மாயாமயை: பாஶைரீஷணுபி4ஸ்ஸுராஸுராந் ।
வத்4வா க்ரீடா3மி தே3வ்யா ச ஜக3த்யஸ்மிம்ஶ்சராசரே ॥ 6 ॥

அஹமேவ ஸுராந்த்ஸர்வாந்மோசகோ ப4க்திபா4வித: ।
மம ரூபமவிஜ்ஞாய ப4வந்தோ விக்3ரஹம் மம ॥ 7 ॥

த்3ரு’ஷ்டைவ்வ சேஷ்டாம் விவிதா4ம் கு3ணபூ4தாம் கு3ணுதிகா:3 ।
விஷயேஷ்வநுரக்தம் மாம் ஜ்ஞாத்வா மோஹம் பரம் க3தா: ॥ 8 ॥

தத3த்3யைவாபநேஷ்யாமி ஶ்ரு’ணுத்4வம் பரமம் மம ।
கோ3ப்யாத்3கோ3ப்யதரம் ஜ்ஞாநமத2ர்வஶிரஸி ஸ்தி2தம் ॥ 9 ॥

ஸர்வஶ்ருதிஶிரோத்3பூ4தம் ஸாக்ஷாத3ஜ்ஞாநநாஶநம் ।
அஹமேகோ நிராதா4ரோ வர்தாம்யாகாஶவத்ஸதா3 ॥ 10 ॥

நைவ லேபோऽஸ்தி மநஸோ மம கார்யேந்த்3ரியைஸ்ஸதா3 ।
ந மஹாபூ4தஸங்கை4ஶ்ச ந காலேந தி3ஶா ஸுரா: ॥ 11 ॥

வஸ்துதோ ஹ்யபரிசி2ந்நோஹ்யஸங்கோ3ऽஸ்மிநிராமய: ।
அவ்யக்த: பரமாத்மாஹம் ஸர்வேஷாமந்தராஸ்தி2த: ॥ 12 ॥

அஹமாதி3ஶ்வ மத்4யஞ்சாப்யஹமந்தஸ்ஸநாதந: ।
ஜக3ஜ்ஜந்மாதி3நாஶோத்த2ங்க்ரியாபி4ர்நாஹமீஶ்வர: ॥ 13 ॥

மத்த ஏவாகி2லம் விஶ்வம் மய்யேவேத3ம் ஸ்தி2தம் ஸுரா: ।
ப்3ரஹ்மவிஷ்ணவீஶ்வரேத்3ரேந்த்3ரா ப4வந்தோ மத்த ஏவ ஹி ॥ 14 ॥

நிர்க3தாஸ்ஸ்த2 ப4வந்தோ வை ஜக3ஜ்ஜாலமித3ம் ஸுரா: ।
ஸோமோऽஹம் ஜநிதா தே3வாஸ்ஸர்வேஷாம் ப4வதாம் ஸுரா: ॥ 15 ॥

ப4வத்3பி4ஸ்ஸஹ மய்யேவ வித்3யதே தச்சராசரம் ।

ந மத்தோऽஸ்தி ப்ரு’த2க்கிஞ்சிந்நேஹ நாநாஸ்தி கிஞ்சந ॥ 16 ॥

மாம் விஜ்ஞாயேத3மகி2லம் ஜாநந்த்யேகம் ஸநாதநம் ।
மமைகத்வபரிஜ்ஞாநாத்கோ மோஹோऽத்ர நிலிம்பகா: ॥ 17 ॥

மாம் விதி3த்வைவ பரமா ஶாந்திஸ்தேஷாம் ஸதை3வ ஹி ।
க்3ரந்தி2பி4ர்நாபி4பூ4யந்தே காம்யகர்மமயைஸ்ஸூரா: ॥ 18 ॥

வத்4யந்தேऽத்ர ப4வந்தோ ஹி விவஶா (பஶவ:) மம மாயயா ।
வாக்யைர்கு3ணமயைர்தே3வாஸ்தத்ப2லம் ப்ராப்யதே தி3வி ॥ 19 ॥

யே யதா2 மாம் ப்ரபத்3யந்தே நாநோபாஸநயா ஸூரா: ।
தாம்ஸ்ததை2வாஹமேவாத்3ய தத்3பா4வாநாம் ப்ரபூரக: ॥ 20 ॥

ததை2வ ப்ரேரயாம்யத்3ய ஸோऽஹங்காரபரோ ப4வேத் ।
மாம் ப்ரேரகமவிஜ்ஞாய கர்தாஹமிதி மந்யதே ॥ 21 ॥

ஸர்வேந்த்3ரியகு3ணாபா4ஸம் ஸர்வேந்த்3ரியவிவர்ஜிதம் ।
ஸர்வஸ்ய ப்ரபு4மீஶாநம் ஸர்வஸ்ய ஶரணம் ஸூரா: ॥ 22 ॥

(ஸர்வஸ்ய ப்ரபு4மீஶாநம் ஸூரஸ்ஸர்வஸ்யகாரணம்) ॥ 22 ॥

அபாணிபாதோ3ऽஜவந: பஶ்யாம்யஹமதந்த்3ரித: ।
அசக்ஷுஶ்ஶ்ரோத்ரஹீநோऽஸ்மி மந:ப்ராணாதிகோ3ऽஸ்ம்யஹம் ॥ 23 ॥

மயாவாஸ்யமித3ம் ஸர்வே மாம் விஜ்ஞாய விமுச்யதே ।
அஹம் ஸர்வஶரீரேஷு விஜாநாமீத3மேவஹி ॥ 24 ॥

ந வேத்தி மாம் ஸூரா: கோऽபி யோக3யுக்தோऽபி கஶ்சந (முக்தயே) ।
ஸர்வாஶ்ரயோऽஹம் ஹி ஸதா3 ஸர்வாதா4ரஶ்ச ஸத்தம: ॥ 25 ॥

பஞ்சகோஶவிஹீநஶ்ச பஞ்சபூ4தாதிகோ3ऽஸ்ம்யஹம் ।
பஞ்சப்ராணாதிக3ஶ்சாஹம் க்வேத3ம் தே3ஹேந்த்3ரியம் ஸூரா: ॥ 26 ॥

அபக்ஷபாதஸஹிதஸ்ஸர்வபூ4தேஷு ஸர்வதா3 ।
லோகோத்த2ஸுக2து:3க2ஶ்ச ஷடு3ர்மிபி4ரபி த்3ருதம் ॥ 27 ॥

நைவ லிப்தோऽஸ்மி தே3ஹேஷு ஹ்யஶீர்ஷ்ணேஹமவஸ்தி2த: ।
ஸூர்யோ யதா2 ஸர்வலோகம் ப்ரவர்தயதி கர்மபி:4 ॥ 28 ॥

லோககார்யவிஹீநஶ்ச தத்3வத்ஸாக்ஷிரஹம் ஸ்தி2த: ।

காயப்ராணமநோத⁴ர்மைர்நாநாஹங்காரஸம்ப⁴வை: ॥ 29 ॥

த⁴ர்மைர்வா பாபஜாலைர்வா நைவ லேபோऽஸ்தி மே ஸூரா: ।
காஷ்டாஹம் பரமஶ்சாஹம் பா⁴ஸகோऽஹம் ஜடே³ஷ்வபி ॥ 30 ॥

பீ⁴பாஸ்மாத³நிலோ வாதி பீ⁴ஷோதே³தி க³ப⁴ஸ்திமாந் ।
பீ⁴ஷைவ சந்த்³ரயமகா பீ⁴ஷைவேத³ம் ஸ்தி²தஞ்ஜக³த் ॥ 31 ॥

ஜ்யோதிஷாம் ஜ்யோதிரஸ்மீஹ பி³ம்பா³பி³ம்பா³திகோ³ऽஸ்ம்யஹம் ।
ஏகத்வம் வா ததா² த்³வித்வம் ப³ஹுத்வம் வா ந கிஞ்சந ॥ 32 ॥

நைவ முக்திர்நைவ ப³ந்தோ⁴ மயி ஸர்வேஶ்வரே ஸூரா: ।
ஸர்வபூ⁴மாத்வஹம் தே³வாஸ்ஸாக்ஷயஸாக்ஷிவிவர்ஜித: ॥ 33 ॥

ந சாணுர்ந மஹாம்ஶ்சாபி நிர்கு³ணஸ்ஸகு³ணோऽபி வா ।
ந மாயா மாயி வா கிஞ்சிந்நைவாஹமபி சேஶ்வர: ॥ 34 ॥

ஏஷோऽஹம் பரமாநந்தோ³ ரஸோऽஹம் ஸர்வவஸ்துக:³ ।
ஏப ப்³ரஹ்மாதி³ஸ்ஸர்வஶ்சாப்யஹமேவ ஸதா³ ஸூரா: ॥ 35 ॥

யூயமாதி³ஸ்ஸர்வ ஏவ ஸீமா பூ⁴மாஹமேவ ஹி ।
ந வேத³வாத³வேதா³ந்தைர்ந கு³ரூக்த்யா ந சேச்ச²யா ॥ 36 ॥

(ந வேத³வாத³வேதா³ந்தைர்ந கு³ரூக்த்யா நசேஜ்யய) ॥ 36 ॥

ந கர்மணா வா தபஸா ப்ராப்நோத்யேகோऽபி வா ஸூரா: ।
மத்ப்ரஸாதே³நைவ தே³வா வ்ரு’ணுதம்ப⁴க்தமேவ ஹி ॥ 37 ॥

மந்நிஷ்டா²ம் ஸர்வபா⁴வேந கஶ்சிஜ்ஜாநாதி வா ந வா ।
அதா²ந்யதா² நயத்யர்த²ம் வேதா³ந்தாநாம் து³ராத்மவாந் ॥ 38 ॥

மாமவிஜ்ஞாய து:³கௌ²கா⁴ந்நைவ முக்தோ ப⁴விஷ்யதி ।
விபூ⁴திம் மம வக்ஷ்யாமி ஶ்ரு’ண்வந்து பரமாம் ஸூரா: ॥ 39 ॥

யல்லாபா⁴ந்நாபரோ லாபோ⁴ மத்ப்ரஸாதே³ந லப்⁴யதே ।
யே ப⁴ஸ்மநிஷ்டாஸ்ஸததம் தேஷாமேவ ப்ரகாஶயேத் ॥ 40 ॥

யே த்ரிபுண்ட்³ரலஸத்³பா⁴லாஸ்தேபாமேதத்ப்ரகாஶ்யதே ।
யே ருத்³ராக்ஷமஹாதே³ஹாஸ்தேஷாமேதத்ப்ரகாஶ்யதே ॥ 41 ॥

யே ருத்³ராத்⁴யாயநிரதாஸ்தேஷாமேதத்ப்ரகாஶ்யதே ।

யே மல்லிங்கா³ராத⁴நேசா²ஸ்தேஷாமேதத்ப்ரகாஶ்யதே ॥ 42 ॥

(யே மல்லிங்கா³ராத⁴நேசா²பி³ல்வபத்ராதி³ஸாத⁴நை) ॥ 42 ॥

யே பஞ்சாக்ஷரஸந்மந்த்ரஜபத்⁴யாநைகமாநஸா: ।
தேஷாம் ஶ்ருதிஶிரோத்³பூ⁴தம் ஜ்ஞாநம் விப்ரேஷு ஜாயதே ॥ 43 ॥

யே ஶிவக்ஷேத்ரநிரதாஸ்தேஷாமேதத்ப்ரகாஶ்யதே ।
அநந்யபா⁴வாஸ்ஸததம் வேதா³ந்தே மயி யே கு³ரௌ ॥ 44 ॥

அநந்யபா⁴வா யே தே³வாஸ்ஸதா³ கௌடில்யவர்ஜிதா: ।
மந்நாமநிரதா யே வை தேஷாமேதத்ப்ரகாஶ்யதே ॥ 45 ॥

ஸர்வேப்⁴யோ தே³வஸங்கே⁴ப்⁴யோ வரிஷ்ட²ம் மந்வதே ஹி யே ।
மத்⁴யாநநிரதா யே வை தேஷாமேதத்ப்ரகாஶ்யதே ॥ 46 ॥

மத்⁴யாநம் வேத³வேதா³ந்தஸாரதாத்பர்யசிந்தநம் ।
தேஷ்வஶக்தேஷு மத்³ரூபசிந்தநம் தத்ப்ரபு³த்⁴யதே ॥ 47 ॥

சிந்தயேந்நீலகண்ட²ம் மாம் த்ரிணேத்ரம் சந்த்³ரஶேக²ரம் ।
உமார்த⁴விக்³ரஹம் ரூபம் ஸ்வஹ்ரு’த்பத்³மஸ்ய ஸத்³மக³ம் ॥ 48 ॥

பா⁴வயந்த்ஸததம் யுக்தஸ்தஜ்ஜ்ஞாநம் ப்ராப்நுயாத்ஸுரா: ।
அபரோக்ஷம் ஹி மே ஜ்ஞாநம் தஸ்ய ஜாயேத நிஶ்சிதம் ॥ 49 ॥

ஏவம் ஸாத⁴நஹீநாநாம் ஜ்ஞாநம் தத்³து³ர்லப⁴ம் ஸுரா: ।
ஶ்ரு’ண்வந் கு³ருமுகை²ர்பா⁴வைர்பு³த்³த்⁴யா ஶப்³தா³ர்த²வேத³நை: ॥ 50 ॥

தந்நைவ தத்ப்ராப்நுயாஜ்ஜ்ஞாநம் கோடிகல்பஶதைரபி ।
மத்ப்ரஸாத³விஹீநோ யோ க்³ரு’ஹீ வாத² யதிர்வநீ ॥ 51 ॥

தந்நைவ ப்ராப்நுயாஜ்ஜ்ஞாநம் ஸாக்ஷாத்ஸம்ஸாரமோசகம் ॥ 52 ॥

யஸ்மிந் க்³ராமே புரே வா ஸததபரிசிதாபாரஶைவப்ரசாரா
ருத்³ராத்⁴யாயஜபாத³ராஸ்ஸிதலமத்³ப⁴ஸ்மத்ரிபுண்ட்³ராத³ரா: ।
ஶம்போ⁴ர்லிங்க³ஸமர்சகாஸ்து ஸுதராம் தே நாதுரம் நைவ தே
ஸம்ப்ராப்யந்தி யமாத்³ப⁴யம் ஜநிஜராரோக³ப்ரஞ்ஶேந வா ॥ 53 ॥

ஜ்ஞாநமேதத³திது³ர்லப⁴ம் ஸுரா பு⁴க்திமுக்திஜநகம் மம ப⁴க்த்யா ।
யுக்தியுக்தகு³ருஸூக்திஸுதா⁴ப்³தௌ⁴ ருத்³த⁴மாத்³யமநக⁴ம் ஸததஞ்ச ॥ 54 ॥

லப்⁴யதே கில பசேலிமபுண்யை: கஸ்யசிந்மமக்ரு’பாவஶதோ ஹி ।
ப$^3$ந்த⁴ஹ்ரு’த்$^3$த்⁴ரு’த$^3$யபே⁴த$^3$கம் ஸுராஹ்யந்யதா$^2$ஸ்ய ந பதா$^2$ ந கர்மணு ॥ 55॥

॥ இதி ஶிவரஹஸ்யாந்தர்க$^3$தே மாஹேஶ்வராக்$^2$யே ஶிவப்ரோக்தம் ஸுரோபதே$^3$ஶ: ॥

- ॥ ஶ்ரீஶிவரஹஸ்யம் । மாஹேஶ்வராக்$^2$ய: ப்ரத$^2$மாம்ஶ: । அத்⁴யாய: 50 - ஸுரோபதே$^3$ஶ: । 5-55॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 50 - suropadeshaH . 5-55..

Notes:
Śiva ஶிவ delivers Upadeśa to Deva-s ஸுரோபதே$^3$ஶ whereby He outlines the methods and merits of worshipping Him.

Encoded and proofread by Ruma Dewan

*Shivaproktam Suropadeshah*
pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*